# सुरवाणीसमाराधकेभ्यः स्वागतम्



डा. कं.कादम्बिनी
सहायकाचार्या
रा. सं. विद्यापीठम्, तिरुपतिः

# अथ द्वितीयाविभक्तिः

# द्वितीयाविभक्तिः

- वाक्ये कर्मपदस्य द्वितीयाविभक्तिः।

  यथा

- माता स्यूतं (स्यूतः), शाटिकां (शाटिका), युतकं (युतकं) च क्षालयति।

# उदाहरणानि

- रमेशः प्रतिदिनं देवं (देवः), जनकं (जनकः), अग्रजं (अग्रजः), आचार्यं (आचार्यः) च नमस्करोति। (पुं)

- सीता लेखनीं (लेखनी), अङ्कनीं (अङ्कनी), कादम्बरीं (कादम्बरी), सूचीं (सूची) च क्रीतवती। (स्त्री)

- बालकः पुस्तकं (पुस्तकं), युतकं (युतकं), चित्रं (चित्रं), क्रीडनकं (क्रीडनकं) च क्रीतवान्। (नपुं)

# कर्मपदस्य त्रिषु कालेषु त्रिषु वचनेषु च द्वितीयाविभक्तिः ।

- सः पाठम् अपठत्। --- भूते
- सः पाठं पठति। --- वर्तमाने
- सः पाठं पठिष्यति। ---- भविष्यति

- बालकः ग्रन्थान् (ग्रन्थः) परिशीलितवान्।
- रामः पत्रिकाः (पत्रिका) पठितवान्।
- वानरः फलानि (फलम्) खादति।

# वाक्ये कृदन्तेभ्यः पूर्वं स्थितानां कर्मपदानां द्वितीयाविभक्तिः

- **क्त्वान्तस्य यथा** –
- रामः पाठं पठित्वा निद्रां करोति।
- भवती विषयं ज्ञात्वा अग्रे पठतु ।
- बालिका लेखनीं पातयित्वा रोदनं कृतवती ।
- ते पत्रिकां पठित्वा विषयं जानन्ति ।

# ल्यबन्तस्य यथा –

- बालकः हस्तं प्रक्षाल्य भोजनं करोति।
- माता पाकं समाप्य मन्दिरं गतवती ।
- भक्तः देवं नमस्कृत्य प्रदक्षिणं करोति।
- भगिनी शाटिकां प्रक्षाल्य आतपे प्रसारितवती ।

## तुमुन्नन्तस्य यथा –

- छात्राः ज्ञानं प्राप्तुं विद्यालयं गच्छन्ति।
- अभ्यासं कर्तुं मम समयः नास्ति ।
- भक्तम् अनुग्रहीतुं देवः भूलोकम् आगतवान् ।
- अङ्क्नीं क्रेतुं सा आपणं गतवती ।

## शत्रन्तस्य यथा –

- भक्तः देवं पश्यन् प्रदक्षिणं करोति।
- शिशुः अम्बां स्मरन् रोदनं करोति।
- कृषकः कृषिं कुर्वन् जीवति।
- छात्रान् बोधयन् अध्यापकः तृप्तिं प्राप्नोति।

# परितः (सर्वासु दिक्षु) इति शब्दस्य योगे द्वितीयाविभक्तिः



# यथा

- देवालयं परितः प्राकारः अस्ति।
- शालां परितः उद्यानमस्ति।
- दीपान् परितः कीटाः सन्ति।
- पुष्पाणि परितः भ्रमराः सन्ति।

| **देवालयः** | | **प्राकारः** |
|---|---|---|
| शाखा | | क्रीडाङ्गणम् |
| शर्करा | | पिपीलिकाः |
| चन्द्रः | | मेघाः |
| वेदिका | | प्रेक्षकाः |
| सा | परितः | सख्यः |
| अध्यापकाः | | बालकाः |
| अध्यापिकाः | | बालिकाः |
| दीपाः | | कीटाः |
| पुष्पाणि | | भ्रमराः |

## यथा

गृहम् उभयतः वृक्षाः सन्ति।



# एवमेव

- चोरम् उभयतः आरक्षकाः सन्ति।
- विद्यालयम् उभयतः उद्यानानि सन्ति ।
- महाराजम् उभयतः सेवकाः सन्ति।

# कम उभयतः के सन्ति इति कथयन्त

| आरक्षकाः | महाचोरः | आरक्षकाः |
|---|---|---|
| सख्यः | लता | सख्यः |
| छात्राः | अध्यापकः | छात्राः |
| धान्यापणाः | वस्त्रापणः | धान्यापणाः |
| वृक्षाः | द्वारम् | वृक्षाः |
| आपणाः | भवनम् | आपणाः |
| आसन्दाः | उत्पीठिका | आसन्दाः |
| भक्ताः | देवः | भक्ताः |
| गजाः | लक्ष्मी | गजाः |
| कर्मकराः | वृद्धः | कर्मकराः |

# सर्वतः प्रयोगे अपि द्वितीया

- देवालयं सर्वतः प्राकारः अस्ति।
- शालां सर्वतः उद्यानमस्ति।
- दीपान् सर्वतः कीटाः सन्ति।
- पुष्पाणि सर्वतः भ्रमराः सन्ति।

# प्रति योगे अपि  द्वितीया

- विवेकः ग्रामं प्रति गतवान् ।
- रमणी मालतीं प्रति सङ्केतं कृतवती ।
- पिता पुत्रं प्रति अवदत् ।

# उच्चैः योगे अपि  द्वितीया

- सः पाठं उच्चैः पठति।
- बालिका कथाम् उच्चैः उक्तवती ।
- छात्राः उच्चैः सम्भाषणं कुर्वन्ति ।

# विना योगे द्वितीयाविभक्तिः

(विना योगे तृतीया, पञ्चमी अपि भवति।)

- धनं विना जीवनं नास्ति।
- लेखनीं विना लेखनं न भवति।
- जलं विना जलचराः न जीवन्ति।
- आत्मविश्वासं विना कार्यं कर्तुं न शक्यते।

# द्वितीयाविभक्तेः प्रयोगः -

- वाक्ये कर्मपदस्य,
- वाक्ये तुमुन्, क्त्वा, ल्यप्, शतृ (कृदन्ताः) तः पूर्वं स्थितानां कर्मपदानाम्,
- परितः (सर्वासु दिक्षु) सर्वतः, उभयतः इति शब्दानां योगे,

- प्रति इति पदस्य योगे
- विना इति पदस्य योगे
- उच्चैः इति पदस्य योगे च द्वितीयाविभक्तिः भवति।

# धन्यवादाः